International Journal of Sanskrit Research 2023; 9(3): 81-86

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 81-86
© 2023 IJSR
www.anantaajournal.com
Received: 01-02-2023
Accepted: 06-03-2023

**Dr. S Sitaramarao**
Assistant Professor, Department of Paraskarapourohityam, S.V. Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. S Sitaramarao**
Assistant Professor, Department of Paraskarapourohityam, S.V. Vedic University, Tirupati, Andhra Pradesh, India

# काण्वीयसमावर्तनपदार्थपरिशीलनम्

## Dr. S Sitaramarao

### 1. प्रस्तावना

संस्कारः द्विप्रकारः। एकः वस्तुनि गुणाधानम् अपरश्च वस्तुनः दोषापनयनम्। सर्वेषु गृह्यसंस्कारकर्मसु दोषापनयनं गुणवत्ता सम्पादनञ्च भवति। मया स्वीकृतः अंशः काण्वीयसमावर्तनपदार्थपरिशीलनम् इत्यमुं विषयम् अधिकृत्य किञ्चित् विवृणोमि। संस्कारो नाम आत्मशरीरान्यतरनिष्ठो विहित क्रियाजन्येतिशय विशेषः। "द्विविधो हि संस्कारो भवति ब्राह्मो दैवश्च[1]" इति हारीतवचनात् संस्कारः ब्राह्मदैवरूपेण द्विविधो भवतीति गम्यते। तत्र गर्भाधानादि षोडशसंस्काराः ब्राह्मीसंस्काराः। पाकयज्ञाः, हविर्यज्ञाः, सौम्याश्च दैवः इति। गर्भाधानं-पुंसवनं-सीमन्तोन्नयनं-जातकर्म-नामकरणम्-निष्क्रमणान्नप्राशने-चौलपनयने- चत्वारिवेदव्रतानि-स्नानम्-सहधर्मिणीसंयोगः-पञ्चमहायज्ञानाम् अनुष्ठानम्, अष्टका- पार्वण-श्राद्धम्-श्रावणी-आग्रहायिणी-चैत्री-आश्वयुजीति सप्तपाकयज्ञसंस्थाः, अग्न्याधेयम्-अग्निहोत्रम्-दर्शपूर्णमासौ- चातुर्मास्यानि- आग्रयणेष्टिः-निरूढपशुबन्धः- सौत्रामणीति सप्तहविर्यज्ञ-संस्थाः। अग्निष्टोमः-अत्यग्निष्टोमः–उक्थ्यः-षोडशी-वाजपेयः-अतिरात्रः-आप्तोर्यामः इति सप्तसोमसंस्थाः इत्येते चत्वारिंशत् संस्काराः इति ज्ञायते। यस्यैते चत्वारिंशत्संस्काराः अष्टावात्मगुणैः साकं सायुज्यमवाप्नोतीति च गम्यते। ब्राह्मसंस्कारेण संस्कृतः ऋषीणां समानतां गच्छति। दैवेनोत्तरसंस्कारेण संस्कृतः देवानां समानतां गच्छतीति च आर्य वचनात् गम्यते। कर्मानुष्ठाने वेद-वेदाङ्ग-इतिहासादीनां महत्त्वपूर्वदायित्वं वर्तते।

शिक्षाव्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।[2]

इति वचनात् कल्पशास्त्रं वेदाङ्गत्वरूपेण प्रकाश्यते। प्रधानतया कल्पशास्त्रं वेदस्य हस्तस्थानीयं वरीवर्ति। कल्पोक्तश्रौत-स्मार्तकर्माचरणेनैव माणवकः संस्कृतो भूत्वा उत्तमां गतिमवाप्नोति। तत् कल्पशास्त्रं चतुर्विधं भवति। 1.श्रौतसूत्रम्। 2.गृह्यसूत्रम्। 3.धर्मसूत्रम्। 4.शुल्बसूत्रमिति। अस्मिन् प्रबन्धे गृह्यसूत्रान्तर्गतं समावर्तनविषयं प्रति विचारयामः।

[1] संस्कारगणपतिः – 07
[2] संस्कारगणपतिः – 25

### 1.1 समावर्तनकालविचारः

सम्+आ उपसर्गपूर्वकात् वृतु वर्तने इत्यस्माद्धातोः ल्युट् प्रत्यये कृते समावर्तनशब्दः निष्पद्यते, अयमर्थः एवं भवति वेदाध्ययनानन्तरं गुरुकुलात् स्वगृहागमनमिति।

“वेदं समाप्य स्नायत्”[3] इति पारस्करगृह्यवचने स्नानपदं समावर्तनसंस्कारः अभिधीयते। मन्त्र-ब्राह्मणात्मकं वेदं सम्यक् अर्थतश्चान्तं नीत्वा वक्ष्यमाणविधिना स्नानं द्वितीयाद्याश्रम-प्रतिपत्तिः तदनुष्ठानयोग्यता सिध्यर्थं कर्तव्यमिति।

“विधिर्विधेयस्तर्कश्च वेदः”[4] इति सूत्रेण वेदशब्दविवरणं निरूपितम्। विधिर्नाम– दर्शपूर्णमासाभ्यां यजेत, अग्निहोत्रं जुहुयात् इत्यादि विधायकब्राह्मणवाक्यानि यानि भवन्ति तानि इत्यर्थः।

“षडङ्गमेके”[5] इति सूत्रात् षडङ्गसहितवेदाध्ययनमिति एकेषाम् आचार्याणाम् अभिप्रायः भवति। **न** कल्पमात्रे[6] इति वचनात् केवलं मन्त्र-ब्राह्मणमात्रम् अध्ययनं न कर्तव्यम्। अर्थतो ग्रन्थतश्चाधिगम्य स्नानमिति गम्यते।

अस्मिन् अध्ययन व्यवस्था त्रयः वैविध्याः सन्ति। मन्त्र-ब्राह्मात्मकं वेदमधीत्य स्नायादिति एकः पक्षः, साङ्गं वेदमधीत्य स्नायादिति द्वितीयः पक्षः, ग्रन्थमात्रमधीत्य यज्ञविदायं च अभ्यस्य स्नायादिति तृतीयपक्षः इति पक्षत्रयं भवति। “गुरुणानुज्ञातः[7]” इति सूत्रात् गुर्वनुज्ञया अध्ययनसमाप्त्यनन्तरं स्नानं कर्तुं अधिकारः यथा योग्यानुसारेण भवतीति गम्यते॥ अस्मिन् विषये याज्ञवल्क्य वचनं एवं भवति।

> गुरवे तु वरं दत्वा स्नायाद्वा तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥[8]

मन्त्रब्राह्मणात्मकं वेदमधीत्य गुरवे अभिलषित द्रव्यं दत्वा तदनुज्ञया स्नानं कारयेदिति। अयं संस्कारः प्रधानतया “वेदं समाप्य स्नायात्”,[9] ब्रह्मचर्यं वा अष्टाचत्वारिंशकम्” इत्यादि गृह्यसूत्रवचनात् यः सम्पूर्णाध्ययनं कृतवान् तस्यैव कृते अयं संस्कारः, तेषामेव दीक्षान्त समारोहसदृशः भवति। कालविषयमधिकृत्य पारस्करः एवं वदति। यथा –

> “ब्रह्मचर्यं वा अष्टाचत्वारिंशकं, द्वदशकेप्येके[10]”

ब्रह्मचर्यव्रतानुष्ठानं अष्टचत्वारिंशत् वर्षाणि आचरणं कृत्वा अनन्तरं वक्ष्यमाणविधिना स्नानं कुर्यादिति प्रथमः पक्षः, अथवा द्वादशवत्सराणि वेदव्रतं आचरित्वा ततः स्नायादिति द्वितीयपक्षः भवति। अस्मिन् विषये याज्ञवल्क्यस्मृतौ –

> प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्चवा। ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥[11]

इति वेदग्रहणार्थं ब्रह्मचर्यविधिम् उक्तवन्तः। मनुनापि –

> षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैविद्यकं व्रतम्। तदर्थिकं पाणिकं वा ग्रहणान्तिकमेव वा ॥[12]

एवं व्यवस्थिततया ब्रह्मचर्येन साकं सह अध्ययनं विधीयते।

### 2. स्नातकानां प्रकाराः

विदायग्रहणदृष्ट्या स्नातकाः त्रिः प्रकारकाः भवन्ति। यथा – “त्रयः स्नातकाभवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक[13]” इति पारस्करः वचनात् विद्यास्नातकाः, व्रतस्नातकाः, विद्याव्रतस्नातकाः मन्यन्ते। येन विद्या तु प्राप्ता परश्च ब्रह्मचर्यस्य पालनं सम्यक् न कृतं सः विद्यास्नातकः। येन ब्रह्मचर्यव्रतस्य पालनं कृतं परश्च विद्या परिपूर्णतया न सम्पादितं सः व्रतस्नातकः। येन ब्रह्मचर्यस्य पालनं सम्पूर्णं विद्या च प्राप्ता सः विद्याव्रतस्नातक रूपेण उच्यते। मनुना नवविध स्नातकानां प्रस्तापनं कृतं स्व स्मृतौ।

> सान्तानिकं यक्ष्यमाणमध्वगं सर्ववेदसम्। गुर्वर्थं पितृमात्रार्थं स्वाध्यायाध्युपतापिनः।
> न वै तान् स्नातकान् विद्यात् ब्राह्मणान् धर्मभिक्षुकान्॥[14]

इति। अत्र व्याख्याकारः कुल्लुकभः, व्याख्याति, यत् सान्तनिकः, सन्तानप्रयोजनत्वात् विवाहस्य सान्तनिको विवाहार्थी। यक्ष्यमाणः अवश्यकर्तव्य ज्योतिष्टोमादियागं चिकीर्षुः। अध्वगः पान्थः। सर्ववेदसः – कृतसर्वस्य – दक्षिणविश्वजिद्यागः। गुर्वर्थः –

[3] परास्करगृह्यसूत्रम् – 2-6-1
[4] परास्करगृह्यसूत्रम् – 2-6-5
[5] परास्करगृह्यसूत्रम् – 2-6-6
[6] परास्करगृह्यसूत्रम् – 2-6-7
[7] परास्करगृह्यसूत्रम् – 2-6-4
[8] याज्ञवल्क्यस्मृतिः 1-51
[9] परास्करगृह्यसूत्रम् – 2-6-1
[10] परास्करगृह्यसूत्रम् – 2.6.2,3
[11] याज्ञवल्क्यस्मृतिः 1.36
[12] मनुस्मृतिः 3-1
[13] परास्करगृह्यसूत्रम् 2-5-32
[14] मनुस्मृतिः 11-1,2

विद्यागुरोः ग्रासाच्छादनाद्यर्थः। एवं पितृ – मातृदावपि। स्वाध्ययार्थी – स्वाध्याध्ययन – कालीन – च्छादनाद्यर्थी ब्रह्मचारी। उपतापी – रोगी। एतान् ब्रह्मणान् धर्मभिक्षाशीलान् स्नातकान् जानीयादिति। एते नवविधाः उक्ताः। एवं उक्त प्रकारेण मन्त्रब्राह्मणात्मकं वेदाध्ययनं कृत्वा अर्थतश्च अधीत्य स्नायात्। अथवा ब्रह्मचर्य व्रतं अध्ययनेन सह अष्टाचत्वारिंशत्, द्वादशवर्षाणि वा पालनं कृत्वा तदनन्तरं स्नायात्। अथवा स्वशक्त्यानुसारेण षडङ्गसहितं वेदमधीत्य यज्ञविद्यां च प्राप्य गुर्वनुज्ञया ज्योतिर्विदुक्त शुभेकाले गुरोः समीपे आचार्यगृहे समावर्तनं कार्यं भवति।

### 3. पदार्थद्रव्य विचारः

समावर्तन संस्कारोक्त द्रव्याणि पारस्करमते एवं सन्ति - समिन्धनकाष्ठानि, समिधः, पर्युक्षणार्थं उदकम्, हरिताः कुशाः, अष्टावुदकुम्भाः, दन्तकाष्ठम्, दधि, नापितः, स्नानार्थं उदकम्, उद्वर्तनद्रव्यम्, कर्णालङ्कारौ, अञ्जनम्, दर्पणम्, नूतनं छत्रं, उपानहौ, वैणवदण्डः, आचार्याय वरद्रव्यम्, इमानि द्रव्याणि समावर्तन कर्मणि भवन्ति।

### 3.1 आश्वलायनमते समावर्तनद्रव्याणि

"अथैतान्युपकल्पयीत समावर्त्यमानो मणिंकुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रजमुन्मर्दनम् अनुलोपनम् आञ्जनमुष्णीषमिति आत्मने चाचार्याय च यद्युभयोर्नविन्देताचार्यायोवेति।"[15] इति सूत्रात् मणिंकुण्डले। अहते वाससी। वस्त्रयुगम्। छत्रम्। उपानद्युगम्। दण्डं वैणवम्। स्रक्काम पुष्पमाला। उन्मर्दनमनुलेपनं कस्तूर्याद्यनुलेपनम्। अञ्जनम्। उष्णीषम्। इत्यादि आत्मने आचार्याय च धारणार्थं कादशद्रव्याणि उपकल्पयेदिति गम्यते।

**3.2. आपस्तम्बमते कपर्दिकारिकारः** द्रव्याणि श्लोकरूपेण कथयति -

सूत्रे वस्त्रे मणियुग – समित् स्रक् सुगन्धास्प्रवर्तौ
शीतौष्णाम्बु – क्षुरकलयवच्छत्रदण्डाजिनानि।
मानोपानद्व्या कुलळकृत् स्नान चूर्णापात्रे
स्नास्यन् युञ्जात्सकृदिह नरः काष्ठमौदुम्बरञ्च।[16] इति।

कण्ठमणि, वस्त्रद्वयम्, सरत्नसुवर्णमणिः। समिधः, पुष्पमाला, सुगन्धः, कुण्डलद्वयम्, शीतोष्णजलम्, क्षुरः, आसनं, यवाः, छत्रम्, वैणवदण्डः, अञ्जनम्, दर्पणम्, उपानहौ, कुशाः, आनडुहं शकृत्, स्नानचूर्णं, पात्रद्वयम्, (उष्ण-शीतजलार्थं) औदुम्बरकाष्ठः, एतानि अष्टाविंशति द्रव्याणि प्राकृतपात्रैः स्रुक् स्रुवादिभिः सह समावर्तन कर्मणि प्रयुञ्जादिति गम्यते। अधुना समिदादि लक्षणानि पश्यामः –

### 3.2.1. वस्त्रधारणम्

शुक्लं तु शुभदं वस्त्रं शीतताप निवारणम्। न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत्।
यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्धनम्। त्वच्यं वशीकरं रुच्यं नवं निर्मलमम्बरम् ॥[17]

वस्त्रधारणेन शीतत्वनिवारणं – यश -काम्य – आयुष्य – आनन्दवर्धकम् – शरीर संरक्षणं च लभ्यते। तथा च एकं चेत्पूर्वस्योत्तर वर्गेण प्रच्छादयीत[18] इति सूत्रात् यदि एकं वासो भवति द्वितीयं न भवति तदा पूर्वस्य परिधानस्यैव वाससा उत्तरभागेन उत्तरीयं कुर्यात्। अस्मिन् विषये कारिकायां एव भवति –

एकश्चेधरीयं स्यात्तस्यैवोत्तरं भागतः। प्रच्छादयीत
मन्त्रोऽपि चोत्तरत्वात्तयोर्भवेत् ॥
चतुस्त्रिद्व्यङ्गुलं वस्त्राकृतिर्वा ब्रह्मसूत्रकम्। अत्रापि यशसामेति कार्यापत्तेर्मनुर्भवेत् [19] ॥

### 3.2.2. उत्तरीयम् – कारिकायाम्

द्वितीयमुत्तरीयं स्यात्परिधत्तेति चेन्नवम्।
मन्त्रेण यशसामेति स्याद्विराचमनं ततः[20] ॥

### 3.2.3. उष्णीषम्

पवित्रं केश्यमुष्णीषं वातातापरजोपहम्।[21] पवित्रत्व आपादनाय उष्णीषधारणं क्रियते, वात – आतपादि – शान्ति निमित्ताय अपि धार्यते।

**3.2.4. समिधः** समिल्लक्षणं छन्दोगपरिशिष्टे

---

15 आश्वलायनगृह्यसूत्रम् 3-8-1

16 आपस्तम्बकपर्दिकारिकाः 5.3

17. भावप्रकाशः दिनर्तुचर्यप्रकरणम् - 88-91

18 पारस्करगृह्यसूत्रम् - 2.6.22

19 संस्कारगणपतिः 742

20. संस्कारगणपतिः 741

21 सुश्रुतसंहिता चिकित्सास्थानम् - 75

नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित्। न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नधिका न्यूना न तथा स्याद्विशाखिका। न सपर्णा न निर्वीर्या होमेषु च विजानता ॥

ब्रह्मपुराणे – पलाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः। अश्वत्थोदुम्बरो बिल्वश्चन्दनः सरलस्तथा॥ शालश्च देवदारुश्च खादिरश्चेति याज्ञिकाः। मरीचिः – विशीर्णा विदला ह्रस्वाः वक्राः ससुषिराः कृशाः। दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशिकाः[22] ॥

**3.2.5. उदकप्राशस्त्यम्**

अस्मिन् संस्कारे अष्टकुम्भमार्जनिमित्तं उदकुम्भः निर्दिष्टः। तत्र विशेषेण उदके सर्वेदेवताः सकलतीर्थानि भवन्ति। तेषामनुग्रहणेन समस्तदोषनिवारणं भवतीति दीक्षान्तरस्नानसाफल्यमपि भवतीति कर्म वैशिष्ट्येन ज्ञायते। जलप्राशस्त्य विषये श्रुतौ एवं भवति।

श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः। ता अस्मभ्यमयक्ष्मा अनमिवा अनागसस्स्वदन्तु देवीरमृता ऋता वृधः[23]।

शीघ्रजीर्णगुणत्वं, सुखकरहेतुत्वम्, यज्ञगुणाधानत्वं सर्वरोगनाशकत्वं पापोपशमनत्वं, सत्यवर्धकत्वम्, अमृतस्वरूपत्वं जले भवतीति ज्ञायते। एतेषां जलविनियोगेन दीक्षा जन्यवृद्धिः जायतेति च गम्यते।

**3.2.6. अष्टकुम्भमार्जनम्**

अस्मिन् संस्कारे गोह्य – उपगोह्य – मयूष – मलिन -मानसिक – विध्वंस – अप्रतिकार्य – रोगार्ति – इन्द्रियनाशनादि अष्टविध दोषाग्नीनां दूरीकृत्य मङ्गलकर अग्निग्रहणनिमित्ताय अष्टकम्भमार्जनं विधीयते। मार्जनेन धन – यश – वेदज्ञान – ब्रह्मवर्चसादि काम्याः प्राप्स्यन्ते।

**3.2.7. हरिताः कुशाः-हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः। समूलाः, पितृदैवत्याः कल्माषा वैश्वदेविकाः ॥ इति**
**कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः। कुशाग्रे शङ्करं विद्यात् त्रयोदेवा व्यवस्थिताः[24] ॥इति**

**दधि-** दधि विनियोगः पावनत्व सिद्ध्यर्थमेव अस्मिन् संस्कारे विधीयतेति गम्यते।

**3.2.8. दन्तधावनम्- दन्तकाष्ठम्**

औदुम्बरेण दन्तान् धावेत्[25] इति सूत्रात् औदुम्बरेण काष्ठेन द्वादशाङ्गुलप्रमाणकाष्ठेन दन्तान् शोधयेत्, दशाङ्गुलं राजन्यस्य, अष्टाङ्गुलं वैश्यस्य काष्टं प्रमाणत्वेन विधीयते। अन्नाद्यायेति मन्त्रेण दन्तधावनम् कार्यम्।

कारिकायाम् – कनिष्ठिकाग्रस्थूलेन काष्ठे नौदुम्बरेण तु। अन्नाद्यायेति धावेत दन्तधावन मार्द्रवत्[26] ॥

उदम्बरे च वाक्सिद्धिः[27] इति ब्रह्मनित्यकर्मसमुच्चय वचनात् औदुम्बर दन्तकाष्ठधावनेन वाक्सिद्धिः जायतेति गम्यते ॥

मुखदुर्गन्धनाशाय दन्तानां च विशुद्धये। ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥[28]

एवं उक्तप्रकारेण ब्राह्मणादीनां द्वादशाङ्गुलादि प्रमाणेन कनिष्ठाङ्गुलिवस्थूलेन औदुम्बरकाष्ठेन मुख-दन्तशुद्ध्यर्थं अन्नाद्यायेति मन्त्रेण धन्तधावनं कार्यमिति भवति।

**3.2.9. दन्तधावनफलविचारः**

पित्तश्लेष्महरं रुच्यं निर्मलं चक्षुषोर्हितम्। श्रोत्रनाडी विशुद्ध्यर्थं नराणां दन्तधावनम् ॥

समावर्तनकाले ब्रह्मचर्यवृतदीक्षान्तरे आश्रमान्तरप्राप्तिनिमित्ताय विहितकाष्ठेन दन्तधावनं विधीयते। तद्वारा रुचिः, पित्त – कफहरं निर्मलत्व शक्तिः, चक्षुर्दीपनं च प्राप्नोति। अस्मिन् संस्काराङ्ग दन्तधावनेन सोमप्रसादमपि भवति।

**3.2.10. उद्वर्तन द्रव्यम्**

उद्वर्तनक्रियार्थं तिलचूर्णं श्रेष्ठं भवति। तद्वारा सु वर्णः अग्निदीपन शक्तिः, उष्णत्व शक्तिश्च प्राप्यते।

---

22 पारस्करगृह्यसूत्रम् - 2.4.3
23 शुक्लयजुर्वेदसंहिता - 4.5.4
24 स्मार्तोल्लासः 143
25 पारस्करगृह्यसूत्रम् - 2.6.17
26 संस्कारगणपतिः पृ740
27. ब्रह्मकर्मसमुच्चयः पृ.6
28 कर्मकाण्डप्रदीपः पृ.156

तिलोवर्णकरस्त्वच्यो बल्यः केश्योऽग्निकृद्गुरुः। उष्णः कफहरो रुच्यो हितश्चोद्वर्तने परम्[29] ॥

### 3.2.11. सुगन्धपुष्पविचारः

सुगन्धानि सुपुष्पाणि नित्यं शिरसि धारयेत्। क्लेशक्लेद समुद्भूत स्वेद दुर्गन्धनाशनम् ॥
चक्षुष्यं दाहशमनं सौमनस्य च धारणम्[30]।

सुगन्धपुष्पाणि प्रतिनित्यं शिरसि धारणेन श्रम – दुःखं -स्वेद – दुर्गन्धानां नाशकारी भवति। एवं च मनोनुकूलः, नेत्राभ्यां रक्षणं ददाति।

### 3.2.12. कर्णालङ्कारौ

कर्णाभरणमत्यन्तं कामिनीजनरञ्जनम्। दोषहारी मनोहारी मनोभवनिकेतनम् ॥[31]

कर्णाभरणधारण द्विजदर्शनेन अत्यन्तकामुकस्त्रीणामपि रञ्जयमनः। एवमेव दोषहरः, मनोल्लासकारी भवति, मन्मथावासमपि च ज्ञायते।

### 3.2.13. अञ्जनम्

सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत्। लोचने भवतस्तेन मनोज्ञे सूक्ष्मदर्शने ॥
स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भवम्। दृष्टेः कण्डूमलहरं दाहक्लेदरुजापहम् ॥
अक्ष्णोरूपावहं चैव सहेतो मारुततापौ। नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्[32] ॥

अञ्जनधारणेन नेत्राभ्यां हितकारी, मनोल्लासः प्राप्यते। एवं च नेत्ररोगाणां हित्वा सुकान्तिं प्रसार्य धन-धान्य-आयुष्य-सर्वसौख्यप्रसादकत्वं भवति।

### 3.2.14. दर्पणम्

काम्यमोजस्करं मेध्यं पापघ्नं सम्प्रहर्षणम्। आगस्तुदोष सम्भूतनिघ्नमादर्शदर्शनम्।
वश्यमाह्लादकृत्पुण्यमादर्शं शिशुभीतिकृत्[33] ॥

दर्पणे प्रतिबिम्ब दर्शनेन ओज – मेध्य – पापहरण – आह्लाद – आगामि दोषाणां हरणं च भवति। एवमेव वशीकरणं – उल्लासकरं च प्राप्नोति। अतः दर्पण दर्शनं पुण्यप्रदायकमिति ज्ञायते।

### 3.2.15. छत्रम्

वर्ण्यं नेत्रहितं छत्रं वातवर्षातपापहम्[34] ॥

छत्रधारणेन देहे सुवर्णं प्रसार्य नेत्रयोः मङ्गलकरं भवति। आतप – वृष्ट्यादीनां आरक्ष्य कान्तिदायक – ओजसादि गुणानां वृद्धिर्जायतेति च।

### 3.2.16. उपानहौ

पादत्राणं प्राणिनां प्राणरक्षां कुर्यान्नित्यं नेत्रयोश्च प्रसादम्।
ग्राही हन्याद्रक्तपित्तं त्रिदोषानाहुस्सन्तः सज्वरघ्नं लघु स्यात्।
सर्पादीनां भीतिभङ्गं नराणां तेजःस्तम्भं वारयेच्चाभिघातान्[35] ॥

उपानहोः धारणेन प्राणिनां हानिः भवति। एवं च नेत्रयोः मङ्गलकरः। त्रिदोषहरणम्– सर्पबाधानिवारणम् – रोगनाशकारकत्वमपि गम्यते। तथा च वृष्य – ओजसादि गुणादीनां वृद्धिर्जायते।

### 3.2.17.वैणवदण्डः

सत्त्वोत्साहं बलकरं स्थैर्यधैर्यविवर्धनम्। अवष्टम्भकरं चापि रक्षोघ्नं दण्डधारणम्[36] ॥

वैणवदण्डधारणेन मनसि नूतसोत्साहः, स्थैर्यम्, धैर्यवृद्धिश्च जायते। एवं च दुष्टशक्तीनां हरणमपि भवति।

---

[29] द्व्यरत्नावलिःपृ.105
[30] द्व्यरत्नावलिःपृ.391
[31] द्व्यरत्नावलिःपृ.395
[32] भावप्रकाशदिनर्तुचर्याप्रकरणम् - 49.51
[33]. द्व्यरत्नावलिःपृ.402
[34] द्व्यरत्नावलिःपृ.401
[35]. द्व्यरत्नावलिःपृ.401
[36] द्व्यरत्नावलिःपृ.402

उपर्युक्त विधिषु विनियोगपदार्थेषु सामान्यफलनिरूपणं मया स्पष्टीकृतः। एभिः फलैस्सह संस्काराङ्ग फलान्यपि विशेषेण बोध्यते। विशेषफलानि संस्कारफलनिरूपण समये मया विव्रीयते।

**3.2.18. वरः**

गुरुदक्षिणारूपेण सामर्थ्यानुसारेण दक्षिणा अथवा - स्नायीत गुर्वनुज्ञातो दत्वास्मै दक्षिणां हि गाम्[37] ॥ इति वचनात् गौर्ब्राह्मणस्य वरः[38] इति वचनाच्च दक्षिणारूपेण गौः देया।

## 4. समावर्तनसंस्कार फलम्

समावर्तनांग मन्त्रेषु बहूनि फलान्तराणि दृश्यन्ते। समिदाधानात् अन्नाद्यं, तेजः, पुष्टिः, यशः, सर्वकाम्यत्वं लभते।

अष्टकम्भोदकमार्जनात् स्नातकस्य यशः, धनलाभः, ब्रह्मवर्चसप्राप्तिः, कळ्याणप्राप्तिः, आरोग्यवृद्धिः, रसोपभोगप्राप्तिः, प्रजोत्पादनशक्तिः प्राप्यन्ते ॥

तथा च वस्त्रधारणेन यशः – दीर्घायुष्यप्राप्तिः, वंशाभिवृद्धिश्च भवति, पुष्पधारणेन श्रद्धा-मेधा-काम्यप्राप्तिः, सद्यस्कामत्वप्राप्तिः, यशः प्राप्तिश्च भवति, उष्णीषधारणेन तेजोवृद्धिः, कुण्डलधारणेन हिरण्यवर्चसं, अञ्जनधारणेन दृश्यशक्तिः, आदर्शवेक्षणेन वर्चसः प्राप्तिः, छत्रधारणेन तेजो यशः प्राप्तिः, उपानहौ धारणेन सर्व प्रतिबन्धक निवृत्तिः, दण्डग्रहणेन सर्वरक्षाप्राप्तिश्च लभ्यते।

## 5. उपसंहार

एवं समावर्तनसंस्कारकर्मणः आचरणेन गार्भिक-बैजिकरूपादि दोषापनयनम्, सर्वविधकामानां वृद्धि-कीर्ति-प्राप्तिरूपफलं, सत्रयागे दीक्षतत्वरूपं प्राप्यन्ते। तथा च अन्नाद्यपुष्टि – तेजसादि रूपाणि बहूनि फलानि समावर्तन कर्माचरणेन लभ्यते। इति शम्।।

## 6. उपयुक्तग्रन्थसूची


1. संस्कारगणपतिः-कर्ता-धुण्डिराजशास्त्री, प्रकाशकः-चौखम्बा संस्कृत सीरीज,वाराणसी, 1995
2. पारस्करगृह्यसूत्रम्-संपादकः-महादेवगङ्गाधर बक्रे, प्रकाशकः-मुन्शीराम मनोहरलाल् पब्लीषर्स
3. याज्ञवल्क्यस्मृतिः-संपादकः-केशवकिशोर मिश्रा, चौखम्बा कृष्णदास अकादमी, वारणासी, 2008
4. मनुस्मृतिः-संपादकः-शिवराज आचार्यः, चौखम्बा विद्याभवन, वाराणसी, 2007
5. आश्वलायनगृह्यसूत्रम्-संपादकः-उमेशचन्द्र पाण्डे, चौखम्बा विद्याभवन, वाराणसी, 2006
6. आपस्तम्बकपर्दिकारिका-लक्ष्मीनरसिंहशास्त्री, मच्छलीपट्टणम्, आन्ध्रप्रदेशः, 2000
7. कर्मकाण्डप्रदीपः,संपादकः-वासुदेव शास्त्री, कृष्णदास अकादमी, वाराणसी, 2002
8. द्रव्यरत्नावलिः- सम्पादकः- वि,रामाराव, दिल्सुखनगर, हाइद्राबाद, 2012
9. स्मार्तोल्लासः- शिवप्रसाद श्रीकिशोर मिश्रा, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, 1999
10. भावप्रकाशः-कान्तिनारयण मिश्रः, खेमराज श्रीकृष्णदास प्रकाशनम्, मुम्बई, 2016
11. शुक्लयजुर्वेद संहिता- बि आर् शर्मा, वैदिकसंशोधन मण्डल, पुणे.1988
12. ब्रह्मकर्मसमुच्चयः-दुर्गाशंकर शास्त्री, दुर्गाशंकरसंस्कृत पुस्तकालय, मुम्बई, 1972


[37]. संस्कारगणपतिः पृ.164

[38]. पा.गृ.1.8.15